# Shivaproktam Kashivasaphalopadesham

# શિવપ્રોક્તં કાશીવાસફલોપદેશમ્

## Document Information

Text title : Shivaproktam Kashivasaphalopadesham

File name : shivaproktaMkAshIvAsaphalopadesham.itx

Category : shiva, shivarahasya, tIrthakShetra, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam | 679-690||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# શિવપ્રોક્તં કાશીવાસફલોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

(શિવપાર્વતીસંવદે)

શિવઃ ઉવાચ

કાશીયં ચઞ્ચલાપાઙ્ગિ સર્વદા સર્વદેહિનામ્ ।
ભુક્તિમુક્તિપ્રદા તસ્માત્સર્વે તિષ્ઠન્તિ સર્વદા ॥ ૬૭૯॥

સર્વદુઃખપ્રશમની સર્વસૌભાગ્યદાયિની ।
કાશ્યાં વાસઃ પ્રયત્નેન સેવનીયો મનીષિભિઃ ॥ ૬૮૦॥

યસ્યાં કાશ્યાં મહાદેવો ભાતિ વિશ્વેશ્વરાભિધઃ ।
તસ્યામસ્યાં શિવે કાશ્યાં દુઃખં નાસ્ત્યેવ સર્વથા ॥ ૬૮૧॥

સન્ત્યત્ર બહવઃ કાશ્યાં મુક્તિમાત્રાર્થિનો નરાઃ ।
તે મદીયાઃ શિવૈતેભ્યો મુક્તિં દાસ્યામ્યસંશયમ્ ॥ ૬૮૨॥

મુક્તિકાન્તાં પ્રયચ્છામિ યસ્યાં કાશ્યામહં શિવે ।
કર્મણા મનસા વાચા યે કાશીવાસનિર્ભરાઃ ॥ ૬૮૩॥

તેભ્યો મુક્તિપ્રદાનાર્થં પ્રભુશ્ચ પ્રતિભૂરહમ્ ।
પશ્યૈતાન્ શાન્તહૃદયા શિવે મોક્ષાર્થમુત્સુકાન્ ॥ ૬૮૫॥

એતાદૃશાનાં ધન્યાનાં નિન્ચં મદ્ભક્તચેતસામ્ ।
મુક્તિર્ભવતિ નિર્વિઘ્નં મત્પ્રસાદાદ્વરાનને ॥ ૬૮૫॥

પશ્યૈનં(તં) જયગીષવ્યં મદર્ચનપરાયણમ્ ।
મદર્ચનાર્થમાયાતિ પૂજાસાધનપૂર્વકમ્ ॥ ૬૮૬॥

અતિવૃદ્ધોઽયમમલો નિત્યં કાલત્રયેસ્પિ મામ્ ।
સમર્ચયતિ બિલ્વાદ્યૈઃ શિવલિઙ્ગસ્વરૂપિણમ્ ॥ ૬૮૭॥

સર્વદા શિવ કાશીશ મહેશ મૃડ શઙ્કર ।

વિશ્વનાથેતિ નામાનિ જપત્યયમનાકુલઃ ॥ ૬૮૮॥

એતાનિ પઞ્ચનામાનિ મમ દિવ્યાનિ શૈલજે ।
કાશ્યામનેકલિઙ્ગાનિ સ્થાપિતાનિ યથાવિધિ ॥ ૬૮૯॥

કાશ્યાં કૃતાન્યનેનૈવ લિઙ્ગદાનાનિ ભૂરિશઃ ।
શૈવાનાહૂય વિધિવચ્છૈવેભ્યો ભક્તિપૂર્વકમ્ ॥ ૬૯૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપાર્વતીસંવદે શિવપ્રોક્તં કાશીવાસફલોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૯ શિવગૌરીસંવાદે કાશીપ્રભાવકથનમ્ । ૬૭૯-૬૯૦॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam . 679-690..

Notes:
Śiva શિવ tells Pārvatī પાર્વતી about the merits of living in Kāśī કાશી and points to Jaigīṣavya જૈગીષવ્ય who has been living there for a long time. Śiva શિવ also mentions about Divya Pañcanāmāni દિવ્ય પઞ્ચનામાનિ of Viśvanātha વિશ્વનાથ viz. Śiva શિવ, Kāśīśa કાશીશ, Maheśa મહેશ, Mṛḍa મૃડ, Śaṅkara શઙ્કર.

Proofread by Ruma Dewan

*Shivaproktam Kashivasaphalopadesham*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*